# संस्कृत-वार्ताः

**दिनाङ्क : 04/07/2025**
**सायम् : 06:20**

**आदौ-मुख्यवार्ताः**

- प्रधानमन्त्री श्रीनरेन्द्रमोदी त्रिनिदाद-टोबैगो-देशे षष्ठवंशश्रेणिक-भारतीयमूलस्य नागरिकाणां कृते ओ.सी.आई-कार्ड इत्यस्य घोषणां कृतवान्; यूपीआई-इति मुद्राविनिमय-व्यवस्थायाः स्वीकरणाय कैरिबियन-राष्ट्राय अभिनन्दनं च कृतवान्।
- अल्पसंख्यक-कार्याणां मन्त्रिणा किरेन्-रिजिजु इत्यनेन उक्तं यत् प्रशासनेन एकसप्ताहस्य आभ्यन्तरे षड्विंशत्यधिक-द्विसहस्रतम-वर्षस्य हज-आवेदनानां स्वीकारः आरप्स्यते।
- भारत-ऋतु-विज्ञान-विभागेन आगामिषु सप्तदिनेषु वायव्य-मध्यभारतेषु च निरन्तरं प्रचण्डवृष्ट्याः पूर्वानुमानं कृतम् अस्ति।
- रशिया-देशः अफगानिस्तानदेशे तालिबान्-सर्वकाराय मान्यताप्रदातृवान् प्रथमः देशः अभवत् ।
- **अपि च**
- क्रिकेट्-क्रीडायां बर्मिन्घम्-नगरे एण्डरसन्-तेंदुलकर-ट्रॉफीति टेस्ट क्रीडायाः द्वितीय-स्पर्धायां आतिथेय-इङ्ग्लैण्ड-दलं भारतं विरुद्ध्य क्रीडति।

**अथवार्ताः विस्तारेण**

**प्रधानमन्त्री-नरेन्द्रमोदी**

प्रधानमन्त्री श्रीनरेन्द्रमोदी त्रिनिदाद-टोबैगो-देशे षष्ठवंशश्रेणिक-भारतीयमूलस्य नागरिकाणां कृते ओ.सी.आई-कार्ड इति भारतीय-विदेशी-नागरिकपत्रस्य घोषणां कृतवान्, येन ते भारते प्रतिबन्धं विना निवासं कार्यं च कर्तुं शक्नुवन्ति। अद्य प्रातः त्रिनिदाद-

टोबैगो-देशे एकं कार्यक्रमं सम्बोधयन् श्रीमोदी भारतीयसमुदायं स्व-पैतृकभूमौ भ्रमितुं, भारतेन सह-सम्बन्धं गभीरं कर्तुं च प्रोत्साहितवान्।

श्रीमोदी यूपीआई-इति मुद्राविनिमय-व्यवस्थायाः स्वीकरणाय प्रथम-कैरिबियन-राष्ट्राय त्रिनिदाद्-टोबैगो-देशाय अभिनन्दनं च कृतवान्। सः अवदत् यत् यूपीआई-अनुमोदनं न केवलं त्रिनिदाद्-टोबैगो-देशाय अपितु भारताय अपि लाभप्रदम् अस्ति।

**प्रधानमन्त्री-अर्जेण्टीना**

पञ्च-राष्ट्रयात्रायाः अग्रिमपदे प्रधानमन्त्री नरेन्द्रमोदी राष्ट्रपतेः जेवियर मिलेइ इत्यस्य आमन्त्रणेन, अर्जन्टीनादेशस्य भ्रमणं करिष्यति। इयं च सप्तपञ्चाशत्-वर्षेषु भारतीयप्रधानमन्त्रित्वेन अर्जेन्टिनादेशस्य प्रथमा द्विपक्षीययात्रा भविष्यति। चर्चासु प्रचलित-सहकार्यस्य समीक्षा भविष्यति, द्वयोः राष्ट्रयोः सामरिक-सहभागिता-वर्धनस्य उपायाः च अन्वेषिताः भविष्यन्ति। आकाशवाण्या सह विशेषसंवादे अर्जेन्टिनादेशे भारतस्य राजदूतः (नियुक्तः) अजनीशकुमारः, प्रधानमन्त्रिणः भ्रमणकाले चर्चायाः सम्भाव्यक्षेत्राणां रूपरेखां प्रकाशितवान्।

**रिजिजू - हज आवेदन २०२६:**

अल्पसंख्यक-कार्याणां मन्त्रिणा किरेन्-रिजिजु इत्यनेन उक्तं यत् प्रशासनेन एकसप्ताहस्य आभ्यन्तरे षड्विंशत्यधिक-द्विसहस्रतम-वर्षस्य हज-आवेदनानां स्वीकारः आरप्स्यते। अद्य नवदिल्ल्यां हज-समीक्षोपवेशना-नन्तरं वार्ताहरैः सह वार्तालापं कुर्वन् श्रीरिजिजुः सर्वेभ्यः आवेदकेभ्यः प्रपत्रं पूरयित्वा समय-सीमायाः आभ्यन्तरे आवेदनं कर्तुम् अनुरोधं कृतवान्। सः भारतस्य हजसमितिं निर्दिष्टवान् यत् सः समयसीमायाः पूर्वं सऊदी अरबसर्वकारस्य औपचारिकतां पूरयेदिति।

**विरामः**

**संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः www.newsonair.gov.in वेबसाइट इत्यत्र, अथ newsonair मोबाइल एप इत्यत्र अपि उपलब्धो भविष्यति।**

**राष्ट्रपतिः**

राष्ट्रपतिपदासीना द्रौपदी मुर्मूः अद्य नवदिल्लीनगरे डुराण्ड्-कप-प्रतियोगिता-विंशति-पञ्चविंशति इत्यस्य चषकानाम् अनावरणं कृत्वा ध्वजं प्रदर्शितवती। ततःपरं सभां सम्बोधयता राष्ट्रपतिना उक्तं यत्, क्रीडा-अनुशासनस्य, दृढनिश्चयस्य, दलभावनायाः च प्रवर्धनं करोति। सा प्रोक्तवती यत् क्रीडायां जनान्, प्रदेशान्, देशान् च संयोजयितुं अद्वितीयशक्तिः वर्तते। राष्ट्रपतिना उक्तं यत् भारते, क्रीडा- राष्ट्रियसमायोजनस्य एकं शक्तिशालि साधनं जातम् ।

**भारत-ऋतु-विज्ञान-विभागः**

भारत-ऋतु-विज्ञान-विभागेन आगामिषु सप्तदिनेषु वायव्य-मध्यभारतेषु च निरन्तरं प्रचण्डवृष्ट्याः पूर्वानुमानं कृतम् अस्ति। ऋतुविभागेन उक्तं यत् राजस्थानम्, मध्यप्रदेशम्, महाराष्ट्रम्, ओडिशा, गोवा, कर्नाटकम् च समेत्य त्रयोदश-राज्यानां कृते अत्यधिकवृष्टेः ऑरेंज अलर्ट इति नारङ्गवर्णीयसंचेतना प्रसारिता अस्ति।

**रूस-देशः-तालिबान्-सर्वकारः**

रशिया-देशेन अफगानिस्तानस्य नूतनराजदूतस्य कृते मान्यता दत्ता, अनेन तालिबान्-सर्वकाराय मान्यताप्रदातृवान् प्रथमः देशः अभवत् । एकस्मिन् वक्तव्ये रशिया-विदेशमन्त्रालयेन उक्तं यत् द्वयोः देशयोः मध्ये सम्बन्धविकासस्य उत्तमाः सम्भावनाः दृष्टाः, अथ सुरक्षायां, आतङ्कवादविरोधे, मादकद्रव्यापराधस्य निवारणे च देशः, काबुलस्य समर्थनं निरन्तरं करिष्यति। तेन उक्तं यत्, विशेषतः ऊर्जा, परिवहनं, कृषिः, आधारभूतसंरचना, इत्यादिक्षेत्रेषु, महत्त्वपूर्णव्यापार-आर्थिक-अवसराः अपि अत्र दृष्टाः ।

**अमितशाह-अश्वारूढप्रतिमा**::

केन्द्रीयगृहमन्त्री अमितशाहः अद्य पुणेनगरस्य राष्ट्रिय-रक्षा-अकादमी-परिसरस्य महान्-मराठा-योद्धा-पेशवा-बाजीराव-प्रथमः इत्यस्य अश्वारूढप्रतिमायाः अनावरणं कृतवान्। अस्मिन् अवसरे प्रवदन् श्रीशाहः बाजीरावस्य अनुकरणीयं नेतृत्वं राष्ट्रसेवाः च प्रकाशयन् उक्तवान् यत्, राष्ट्रिय-रक्षा-अकादमी भूसेनायाः, नौसेनायाः, वायुसेनायाः च भाविनेतॄणां प्रशिक्षणक्षेत्रमस्ति, यद्धि बाजीरावस्य प्रतिमायाः कृते सर्वाधिकं उपयुक्तं स्थानम् अस्ति।

**जम्मूकश्मीर-अमरनाथजी**

औपचारिकरूपेण ह्यः आरब्धः अष्टत्रिंशत्-दिवसीया वार्षिक-श्री-अमरनाथ-जी-यात्रा दक्षिणकश्मीरस्य अनन्तनागमण्डलस्य पहलगामस्य, मध्यकश्मीरस्य गण्डेर्बल-मण्डलस्य बालतालस्य मार्गद्वयादपि सुचारुतया प्रचलति। कठोरसुरक्षा-प्रबन्धनेन उभयमार्गात् प्रातःकाले यात्रीणां प्रचलनम् आरब्धम्। पहलगाममार्गेण चन्दनवारीं प्रति त्रिसहस्राधिकाः भक्ताः, बालताल-गण्डेर्बल-आधारशिबिरात् पवित्रगुहातीर्थं प्रति सप्तशताधिक-सप्तसहस्रतोऽधिकाः तीर्थयात्रिकाः च अनुमताः सन्ति।

**हिमाचल-प्रवर्षः**

हिमाचलप्रदेशे प्रावृट्-वृष्टिः निरन्तरं प्रचलति। ऋतुविभागेन राज्यस्य अधिकांश-भागेषु जुलैमासस्य पञ्चम-तः अष्टम-दिनाङ्क-पर्यन्तम् अत्यन्तं प्रचण्डवृष्टेः, वज्रपातस्य, विद्युत्पातस्य च सञ्चेतना प्रसारितास्ति। स्थित्यानुसारम् आगामिचतुर्दिनानां

कृते **ऑरेंज अलर्ट** इति नारङ्गवर्णीय-संचेतनापि प्रसारितास्ति। राज्यस्य आपत्कालीनसञ्चालनकेन्द्रस्य अनुसारम् अस्मिन् प्रावृटकाले अद्यावधि ऊनसप्ततिः जनाः मृताः, सप्तत्रिंशत् जनाः अद्यापि लुप्ताः सन्ति ।

**शाह-वृष्टिः:**

गृहमन्त्री अमितशाहः अद्य गुजरात-हिमाचलप्रदेश-राजस्थान-उत्तराखण्ड-छत्तीसगढ-राज्यानां मुख्यमन्त्रिभिः सह भाषितवान्। एकस्मिन् सोशल-मीडिया संदेशे श्रीशाहः अवदत् यत् आवश्यकता-वशात् जनानां कृते राज्येषु पर्याप्तसङ्ख्यायां एनडीआरएफ-इति राष्ट्रिय-आपदोद्धार-दलानि नियोजितानि सन्ति, आवश्यकतानुसारम् इतोऽपि अधिकानि दलानि प्रेषयितुं शक्यन्ते। मुख्यमन्त्रिभ्यः केन्द्रसर्वकारेण सर्वसम्भवं साहाय्यस्य आश्वासनं अपि दत्तवान् ।

**क्रीडायाम्**

विम्बल्डन् टेनिस् क्रीडायाम्, एन.श्रीराम-बालाजी तस्य मेक्सिकोदेशस्य सहक्रीडकेन मिगेल् रेयस् इत्यनेन सह पुरुषयुगलस्य द्वितीयपरिक्रमे गच्छति।

**क्रिकेट्-**

क्रिकेट्-क्रीडायां बर्मिन्घम्-नगरे एजबेस्टन् क्रीडाङ्गणे एण्डरसन्-तेंदुलकर-ट्रॉफीति टेस्ट क्रीडायाः द्वितीय-स्पर्धायाः तृतीयदिने इङ्ग्लैण्ड-दलं भारतं विरुद्ध्य क्रीडति। अन्तिमसूचनापर्यन्तं इङ्ग्लैण्ड-दलेन पंच-स्तोभकानां हानि-पुरस्परं ऊनपंश्चाशत्-अधिक-द्विशत-धावनाङ्काः समार्जिताः।

**।। इति वार्ता: ।।**